# षष्ठः पाठः

## सोमदत्तप्राप्ति–कथा

[प्रस्तुत पाठ महाकवि दण्डी द्वारा रचित दशकुमारचरित की पूर्वपीठिका के प्रथम उच्छ्वास से संकलित है। इस कथा–ग्रन्थ में दण्डी ने दस कुमारों के रोमांचक वृत्तान्तों का वर्णन किया है। कुछ कुमार राजपुत्र हैं जबकि कुछ अमात्य–पुत्र हैं। दशकुमारचरित तीन भागों में विभक्त है– पूर्वपीठिका (पाँच उच्छ्वास), मध्य दशकुमारचरित (आठ उच्छ्वास) तथा उत्तरपीठिका। इस पाठ में सोमदत्त नामक अमात्य–पुत्र की प्राप्ति की कथा दी गई है जो अत्यन्त रोमांचक स्थितियों में मगधराज राजहंस के समक्ष आया है। इसमें वाक्यों का लालित्यपूर्ण विन्यास अत्यन्त आकर्षक है।]

ततः परस्मिन्दिवसे वामदेवान्तेवासी तदाश्रमवासी समाराधितदेवकीर्ति निर्भर्त्सितमारमूर्तिं कुसुमसुकुमारं कुमारमेकमवगमय्य नरपतिमवादीत् – ' देव ! तीर्थयात्राभिलाषेण कावेरीतीरमागतोऽहं तत्र विलोलालकं बालकं निजोत्सङ्गतले निधाय रुदतीं स्थविरामेकां विलोक्यावोचम् – ' स्थविरे! का त्वम्, अयमर्भकः कस्य नयनानन्दकरः, कान्तारं किमर्थमागता, शोककारणं किम् इति।

सा करयुगेन बाष्पजलमुन्मृज्य निजशोकशङ्कूत्पाटनक्षममिव मामवलोक्य शोकहेतुमवोचत् – ' द्विजात्मज! राजहंसमन्त्रिणः सितवर्मणः कनीयानात्मजः

सत्यवर्मा। तीर्थयात्राभिलाषेण देशमेनमागच्छत्। स कस्मिंश्चिदग्रहारे काली नाम कस्यचिद् भूसुरस्य नन्दिनीं विवाह्य तस्या अनपत्यतया गौरीं नाम तद्भगिनीं काञ्चनकान्तिं परिणीय तस्यामेकं तनयमलभत। काली सासूयमेकदा धात्र्या मया सह बालमेनमेकेन मिषेणानीय तटिन्यामेतस्यामाक्षिपत्। करेणैकेन बालमुद्धृत्यापरेण प्लवमाना नदीवेगागतस्य कस्यचित्तरोः शाखामवलम्ब्य तत्र शिशुं निधाय नदीवेगेनोह्यमाना केनचित्तरुलग्नेन कालभोगिनाहमदंशि। मदवलम्बीभूतो भूरुहोऽयमस्मिन्देशे तीरमगमत्। गरलस्योद्दीपनतया मयि मृतायामरण्ये कश्चन शरण्यो नास्तीति मया शोच्यते इति।

ततो विषमविषज्वालावलीढावयवा सा धरणीतले न्यपतत्। दयाविष्टहृदयोऽहं मन्त्रबलेन विषव्यथामपनेतुमक्षमः समीपकुञ्जेष्वौषधिविशेषमन्विष्य प्रत्यागते व्युत्क्रान्तजीवितां तां व्यलोकयम्।

तदनु तस्याः पावकसंस्कारं विरच्य शोकाकुलचेता बालमेनमगतिमादाय सत्यवर्मवृत्तान्तश्रवणवेलायां यन्निवासाग्रहारनामधेयस्याश्रुततया तदन्वेषणमशक्यमित्यालोच्य भवदमात्यतनयस्य भवानेवाभिरक्षितेति भवन्तमेनमनयम्।

तन्निशम्य सत्यवर्मस्थितेः सम्यगनिश्चिततया खिन्नमानसो नरपतिः सुमतये मन्त्रिणे सोमदत्तं नाम तदनुजतनयमर्पितवान्। सोऽपि सोदरमागतमिव मन्यमानो विशेषेण पुपोष।

## शब्दार्थाः

| | | |
|---|---|---|
| **अन्तेवासी** | शिष्यः | छात्र |
| **कान्तारम्** | अरण्यम् | वन |
| **स्थविराम्** | वृद्धाम् | वृद्ध स्त्री को |
| **तीरम्** | पुलिनम् | तट |
| **वाष्पजलम्** | अश्रु | आंसू |
| **उन्मृज्य** | प्रोञ्छ्य | पोंछकर |
| **अवोचत्** | अवदत् | कहा |
| **अनपत्यतया** | सन्तानाभावेन | सन्तान न होने के कारण |
| **तनयम्** | आत्मजम् | पुत्र को |
| **भूरुहः** | वृक्षः | पेड़ |
| **शरण्यः** | आश्रयदाता | शरण देने वाला |
| **निधाय** | संस्थाप्य | रख कर |
| **करेण** | हस्तेन | हाथ से |
| **धरणीतले** | भूतले | पृथ्वी पर |
| **अशक्यम्** | असम्भवम् | असम्भव |
| **निजोत्सङ्गतले** | स्वकीयक्रोडे | अपनी गोद में |
| **आदाय** | गृहीत्वा | लेकर |

| | | |
|---|---|---|
| **सासूयम्** | ईर्ष्यापूर्वकम् | ईर्ष्या के साथ |
| **कालभोगिना** | सर्पेण | साँप द्वारा |
| **गरलम्** | विषम् | विष |
| **विरच्य** | कृत्वा | बनाकर |
| **निर्भर्त्सितमारमूर्तिः** | कामदेवात् सुन्दरतरः | कामदेव से अधिक सुन्दर |
| **विलोलालकः** | चञ्चलकेशपाशः | हिलते हुए केश वाला |
| **मिषेण** | व्याजेन | बहाने से |
| **अग्रहारे** | राजदत्तग्रामे | राजा के दिये गाँव में |
| **काञ्चनकान्तिः** | स्वर्णवत् रूपयुक्तः | कान्तिमय |
| **प्लवमाना** | तरन्ती | तैरती हुई |
| **उह्यमाना (वह्+यक्+शानच्)** | नीयमाना | ले जायी जाती हुई |
| **अदंशि** | दष्टा | डँसी गई |
| **शोकशङ्कुः** | शोकरूपं कण्टकम् | शोकरूप काँटा |
| **उत्पाटनक्षमम्** | निष्कासने समर्थम् | निकालने में समर्थ |
| **उद्दीपनतया** | उत्कटतया | बढ़ जाने से |
| **ज्वालावलीढावयवा** | ज्वालया ग्रस्ताङ्गवती | दाह से प्रभावित अंगों वाली |
| **अपनेतुम्** | निवारणाय | दूर करने में |

| | | |
|---|---|---|
| **अक्षमा** | असमर्था | अशक्त |
| **शोकाकुलचेता** | विषादव्याकुलहृदयः | विषाद से व्याकुल मन वाला |
| **खिन्नमानसः** | विपन्नचित्तः | दुःखी मन वाला |
| **पुपोष** | पालितवान् | पालने लगा |

## व्याकरणम्

### सन्धिः

वामदेवान्तेवासी = वामदेव + अन्तेवासी

तदाश्रमवासी = तद् + आश्रमवासी

विलोक्यावोचम् = विलोक्य + अवोचम्

द्विजात्मजः = द्विज + आत्मजः

उद्धृत्यापरेण = उद्धृत्य + अपरेण

कस्यचित्तरोः = कस्यचित् + तरोः

भूरुहोऽयमस्मिन्देशे = भूरुहः + अयम् + अस्मिन् + देशे

प्रत्यागतः = प्रति + आगतः

भवानेवाभिरक्षितेति = भवान् + एव + अभिरक्षिता + इति

## समास

निर्भर्त्सितमारमूर्तिम् = निर्भर्त्सिता मारस्य मूर्तिः येन तम्

(बहुव्रीहिसमासः)

विषमविषज्वालालीढावयवा = विषमं विषं (कर्मधारयः)। तस्य ज्वालया अवलीढाः (तृतीया तत्पु0) अवयवाः यस्याः सा (बहुव्रीहिसमास)। शोकाकुलचेता – शोकेन आकुलं चेतः यस्य सः (बहुव्रीहि समासः)।

## व्युत्पत्तिः

विलोक्य = वि +√लोक् + ल्यप्

निधाय = नि +√धा + ल्यप्

उन्मृज्य = उद् +√मृज् + ल्यप्

अवलम्ब्य = अव +√लम्ब् + ल्यप्

विरच्य = वि +√रच् + ल्यप्

आलोच्य = आ +√लोच् + ल्यप्

निशम्य = नि +√शम् + ल्यप्

## अभ्यासः

1. **निम्नलिखितानां प्रश्नानाम् उत्तरं संस्कृतभाषायां लिख्यताम्–**

(क) सत्यवर्मा कः आसीत् ?

(ख) सत्यवर्मणः भार्ये का आस्ताम् ?

(ग) सोमदत्त : कीदृशः आसीत् ?

(घ) वृद्धायाः शोकस्य किं कारणम् आसीत् ?

(ङ) गौरी का आसीत् ?

2. **अधोलिखितानां पदानां संस्कृतवाक्येषु प्रयोग कुरुत–**

(i) अन्तेवासी (ii) आगता (iii) कान्तारम्

(iv) भूरुहः (v) अक्षिपत् (vi) आदाय

3. **निम्नलिखितानां पदानां प्रकृतिप्रत्यय–विभागं कुरुत –**

(i) निधाय (ii) विलोक्य (iii) उन्मृज्य

(iv)प्रत्यागतः (v) विरच्य

4. **सन्धिविच्छेदं कुरुत –**

(i.) कुञ्जेष्वोषधिविशेषम् (ii.) इत्यालोच्य (iii.) नास्तीति

(iv.) तन्निशम्य (v.) सम्यगनिश्चिततया

5. **अधोलिखितानां पदानां रिक्तस्थानेषु प्रयोगं कुरुत –**

**सत्यवर्मा, वाष्पजलम् , विलोलालकम्, पुपोष, न्यपतत्।**

(क) सा करयुगेन ................ उन्मृज्य मामवलोक्य अवोचत्।

(ख) सितवर्मणः कनीयानात्मजः ..................... आसीत्।

(ग) सा धरणीतले ................ ।

(घ) तत्र स .............................. बालकम् अपश्यत्।

(ङ) सोऽपि सोदरमागतमिव मन्यमानो विशेषेण ......................।

**6. अधोलिखितेषु वाक्येषु ल्यप् प्रत्ययस्य प्रयोगः क्रियताम्।**

(क) एकां वृद्धां ............. अन्तेवासी अवदत्। (वि, लोक)

(ख) सः कुसुमसुकुमारं बालकं निजोत्सङ्गतले ............ रुदतीं वृद्धाम् अपश्यत्। (नि, धा)

(ग) सा करयुगेन वाष्पजलम् .................... अवोचत्। (उत्, मृज)

(घ) तस्याः वचनं .............. शोकाकुलचेताः सः गतः। (नि, शम्)

(ङ) तं बालकम् ............... सः अन्तेवासी अपि गतः। (आ, दा)

**7. उचितविभक्तिप्रयोगं कृत्वा वाक्यानां पूर्तिः करणीयाः–**

(क) अस्मिन् ................. किमर्थम् आगता ? (वन)

(ख) सा ............... अवलोक्य अवोचत्। (अस्मद्)

(ग) काली .......... सह नदीतटे अगच्छत्। (तत्)

(घ) सः .................... विषव्यथाम् अपनेतुं क्षमः आसीत्। ( मन्त्रबल )

(ङ) ........................ करेण बालमुद्धृत्य अपरेण प्लवमाना स्त्री मया दृष्टा। (एक)

**8. अस्य पाठस्य सारांशः हिन्दीभाषायां लिखत।**

**9. निम्नलिखितानां प्रश्नानामुत्तरेषु शुद्धम् उत्तरं लिख्यताम् –**

(i.) सोमदत्तप्राप्तिकथायाः रचनाकारः कः आसीत् ?

(क) कालिदासः (ख) भारविः (ग) दण्डी (घ) वाल्मीकिः

(ii.) " सोमदत्तप्राप्ति–कथा " दशकुमारचरितग्रन्थस्य कस्मिन् भागे वर्तते?

(क) पूर्वपीठिकायाः द्वितीयोच्छ्वासे

(ख) पूर्वपीठिकायाः प्रथमोच्छ्वासे

(ग) उत्तरपीठिकायाः द्वितीयोच्छ्वासे

(घ) उत्तरपीठिकायाः प्रथमोच्छ्वासे

(iii.) सोमदत्तस्य माता का आसीत् ?

(क) काली (ख) माला (ग) गौरी (घ) सूर्या

(iv.) गौरी कस्य पत्नी आसीत् ?

(क) राजहंसस्य (ख) सितवर्मणः

(ग) सत्यवर्मणः (घ) कृष्णवर्मणः